# प्रथमोऽध्यायः
# ज्योतिषशास्त्रपरिचयात्मकः

1. षड्वेदाङ्गेषु ज्योतिषं तन्महत्त्वञ्च ।

2. ज्योतिषशास्त्रस्य परिचयः तद् वैशिष्ट्यमुपयोगिता महत्त्वञ्च ।

3. ज्योतिषशास्त्रे विविधयोगाः तेषामुपयोगिता च ।

## 1. षड्वेदाङ्गेषु ज्योतिषं तन्महत्त्वञ्च

संस्कृतभाषायां अनेकाानि शास्त्राणि सन्ति। एतानि शास्त्राणि वेदेभ्यः एव निर्गतानि। यदुक्तं मनुना ––

सर्वं वेदात् प्रसिद्धयति।'' इति।[1]

समस्तसंस्कृतवाङ्गमयस्यमूलाधारः मूलश्चत्वारो वदोः सन्ति। वेदस्य षडाङ्गानि निम्नाः सन्ति। तद्यथा –

शब्दशास्त्रं मुखं ज्योतिष चक्षुषी श्रोत्रमुखं च कल्पः करौ।
या तु शिक्षाऽस्य वेदस्य सा नासिका पादद्वयं छन्दः अद्यैबुर्धैः।।[2]

अनेन ज्ञायते यत् वेदाः एव सर्वेषां शास्त्राणां प्रसवभूमिः। तत्र वेदाङ्गाानिअपि षडेव। तद्यथा –

1. शिक्षा
2. कल्पम्
3. व्याकरणम्
4. निरुक्तम्
5. ज्योतिषम्
6. छन्दः च।

एतेषु अङ्गेषु ज्योतिषं नेत्रत्वेन स्वीकृतम्। ज्योतिषशास्त्रस्य उपजीव्यरूपेण अनेके मन्त्राः वेदेषु प्राप्यन्ते।

''वेद चक्षुः क्लेदं स्मृतं ज्योतिषम्
मुख्यतयाङ्गमध्येऽस्य तेनोच्यते।।''[3]

---

1. मनु
2. सि.शा. –10
3. यजुर्वेद

सिद्धान्तशिरोमणेः प्रथमाऽध्यायस्य श्लोकः वर्तते। यथा –

चक्षुषाङ्गेन हीनो न किंञ्चित्करः।[1]

अनेन निष्प्रचम् कथयितुं शक्यते यत् शास्त्रामिदं लोकव्यवहारि उपयोगिरूपेण अस्ति। तर्हि अस्य शास्त्रस्य का परिभाषा, किं स्वरूपम्, के –के वर्ण्यविषयाः इत्यादयः प्रश्नाः समुद्रभवन्ति। एतेषां प्रश्नानां समाधानाय अस्य शास्त्रस्य सामान्यरूपेण परिचयः अत्रोपस्थाप्यते।

**ज्योतिषस्य वेदमूलकत्वम्**

अस्माकं भारतीयसंस्कृतेः आधारभूते वेदेष्वपि ज्योतिषस्य वर्णनं प्राप्तं भवति। कारणं च वेदप्रतिपाद्यानां यज्ञमायोजनं कालसापेक्षं भवति। केचन यााः संवत्सरः सम्पाद्याः भवन्ति, केचन मासः सम्पाद्याः भवन्ति, केचन पक्ष सम्पाद्याः भवन्ति।

यज्ञकालमधिकृत्य तैतिरीय ब्राह्मणे कथितोऽस्ति। तद्यथा ––

**प्रातर्जुहोति, सायं जुहोति, इति।**[2]

यज्ञानुष्ठाने येन प्रकारेण विधानस्य शुद्धिरावश्यकी भवति, तेनैव प्रकारेणकालस्यापि शुद्धिरावश्यकी भवति।

उक्तं च श्रुतिः ––

ते असुरा अयज्ञा अदक्षिणा अनक्षत्राः।

यच्च किञ्चाकुर्वत तां कृत्यामेवाकुर्वतः।।

अनेन कारणेन यज्ञानुष्ठानाय कालस्य शुद्धिः आवश्यकी। उक्तं च आर्ष –ज्योतिषे। तद्यथा –––

वेदाहि यज्ञार्थमभिप्रवृताः कालनुपूर्वो विहितश्च यज्ञाः।<br>
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद सवेद यज्ञान्।।[3]

---

1. सिद्धान्तशिरोमणि–1/11
2. तैतिरीय ब्राह्मण – 2/1/2
3. आ. ज्योतिष – 63

चतुर्णामपि वेदानां ज्योतिषशास्त्रमपि पृथकमस्ति। तद्यथा ––

ऋग्वेदस्य ज्योतिषम्– षट्शतपद्यात्मकं आर्षज्योतिषम्।

यजुर्वेदस्य ज्योतिषम्– एकोनचत्वारिंशतपद्यात्मकमायुषज्योतिषम्।

अथर्ववेदस्य ज्योतिषम् – द्विषष्टियुतरशतपद्यात्मकर्थ्वणज्योतिषम्।

सामवेदस्यज्योतिष अधुना नोपलभ्यते। पूर्वोक्तत्रयाणां ज्योतिषशास्त्रस्य प्रणेता लगधः नाम्ना आचार्यः वर्तते। आयुष्ज्योतिषस्य प्रामाणिकं भाष्यमपि समुपलभ्यते।

तद्यथा ––

1. सोमकरविरचितम् भाष्यम् ।
2. सुधाकरद्विवेदिकृतम् भाष्यम्।

वेदः ज्ञानराशिः अस्ति। वेदेषु सर्वे विषयाः समाहिताः सन्ति। वेदानामध्ययनेन ज्ञायते यत् अत्र ज्ञानमीमांसा अस्ति पृथिव्याः गतिः द्वैविध्यां अस्ति। वेदे वर्णाश्रमधर्मविषयः अस्ति। वेदे विज्ञामपि अस्ति। एवं प्रकारेण प्रायेण जगतः सर्वे विषयाणां उल्लेखः वेदेषु प्राप्यते। अत्र तु चतुर्वेदेषु ज्यौतिषशात्रस्य के सन्दर्भः सन्ति इत्यस्य निरूपणमुपस्थाप्यते।

वेदाङ्गज्योतिषग्रन्थस्य प्रणेता आचार्य लग्धः एवासीत इत्यत्र नास्ति मतभेदः। वेदाङ्गज्योतिषग्रन्थस्य अवतारकालः 3400 वत्सरेभ्योऽपि पूर्ववर्ती वर्तते। उपर्युक्तवर्णनेन ज्योतिषस्य वेदमूलकत्वं स्वयं सिद्धयति।

## 2.ज्योतिषशास्त्रस्य परिचयः तद् वैशिष्ट्यमुपयोगिता महत्त्वञ्च

**ज्योतिषशास्त्रस्य परिभाषा –**

ज्योतिषं सूर्यादिग्रहाणां बोधकं शास्त्रम्, कालविधानशास्त्रमञ्च। ज्योतिषशास्त्रास्येतिहासः स्वरूपं च वेदकालादेव प्रस्फुटम् भवति।

अस्मिनशास्त्रे द्युलोके नानाविधविद्यमानज्योतिषपिण्डानां ज्ञानं अध्ययनं च भवति। अतः आकाशे चन्द्रः नक्षत्रादीनां च ग्रहाणां च मूलोत्पत्तिः सूर्यात् एव प्रकाशितः भवति।

एवं आकाशमण्डले सूर्यस्य प्रकाशः दृश्यते। अतएव संभवतः अस्य शास्त्रस्य नामकरणं ज्योतिषसम्बन्धितविषयाणां समावेशकारणेन ज्योतिष–शास्त्रमित्युच्यते। वयं तु जानीमः यत् सूर्यादिग्रहाणां ज्ञानं कालगणनात्यादीनाम् बोधः यस्मिन्शास्त्रे च भवति। तदेव ज्योतिषशास्त्रम् कथ्यते।

अत्र प्राधान्येन ग्रहाः नक्षत्राणि, धूमकेतु आदि ज्योतिः पदार्थानां स्वरूपाणि इत्यादि परिभ्रमणकालादि ग्रहणस्थिति इत्यादि प्रभृतिकालदारभ्य समस्तं निरूपणं एवं ग्रहाणां नक्षत्रादीनां स्थितिः वा गोचरे भ्रमणादिप्रभावात् शुभाशुभफलादेशः च क्रियन्ते।

केंषाचित विदुषां च मतेन आकाशमण्डले स्थित समस्तज्योतिः सम्बधित –विविध विषयाणां समावेशकारणेन शास्त्रम् इयमेव ज्योतिर्विद्या नामकरणं च कृतम्।

यस्मिन शास्त्रे च पूर्वोक्त विषयाणां विस्तृतं वर्णनं दरीदृश्यते तत् एव ज्योतिषशास्त्रम्।

**पाणिनिमतानुसारं** द्युतिधातोः ''द्युतेरिसिन्नादेश्च ज'' इति जकार भूत्वा ''ज्योतिः'' शब्दनिष्पन्नो भवति। तदुपरान्तम् '' अधिकृत्य कृतेग्रन्थे'' इत्यनेन सूत्रेण अण् प्रत्यय भूत्वा ज्योतिष शब्दः निष्पन्नो भवति। ज्योतिष शब्दस्य विविधार्थाः भवन्ति। यथा – ज्योतिः, प्रकाशः, तेजः, दीप्तिः, प्रभासनमादि। गगनमण्डले दृश्यमानानि यानि हि तेजोमयानि विविधानि बिम्बानि दृश्यन्ते। तानि सर्वाण्येव ज्योतिः पदेन ज्ञायते। खगोले दृश्यमानानि यानि हि यदैकरूगतीनि तानि नक्षत्र शब्देनाभिः–धीयते। प्रतिदिनं भिन्नं–भिन्नं गत्या तु ग्रहशब्देन ज्ञायन्ते। ज्योतिसम्बन्धिः विविधविषयोपरि तेषां गतिप्रभावादिवर्णनपरकं जातकपारिजातः, वृहत्संहिता, मुहूर्तचिन्तमण्यादिग्रन्थाः ज्योतिषग्रन्थरूोण प्रसिद्धाः ।

## ज्योतिषस्य स्वरूपम्

आकाशे यदा कोऽपि मनुजः अवलोकयति तदा तस्य दृष्टिपातस्य सार्धमेव तस्य मस्तिके अनेकानां प्रश्नानां विचारं आगचछन्ति, यथा – दृश्य ग्रहाः नक्षत्राणि च कानि ?

ज्योतिः पिण्डानि खण्डोभूत्वा उर्ध्वतः भूम्युपरि किमर्थं वा केन कारणेन न पतन्ति। पुच्छलतारा किम्, एवं केचित् दिनान्तरं ते विलुप्तं कथं जायन्ते?

दिने–दिने वा पौनः–पुन्येन तपनः हेलिः वा पूर्वस्यां दिशि एव काथमुदितं जातम्।

## ऋतुपरिवर्तनम्

अस्मिन् संसारे नरः एव चैतन्यः तेन कारणेन स तु प्रायः किमपि विषयोपरि विचारादीनां अध्ययनं एव कर्तुं दृश्यते। अतएव नरः कोऽपि नवीन वस्तुं दृष्टवा च तस्मिन् विषये निम्नप्रश्नानामभ्युदयं च दृश्यते। यथा–किम् ? कथम् ? किं भवति ? किं भविष्यति ?

प्रत्यक्षं दृष्ट्वा एव सः सन्तुष्टं दृश्यते। कदापि येन प्रत्यक्षं न लभ्यते। तेन अपि ज्ञातुं चिन्तनशीलश्च दृश्यति। अतएव कोऽपि विषयोपरि शोधं कृत्वा तस्य फलास्वादनं समये मनुष्यः प्रायेण हर्षोल्लासं च अनुभूयते।

मनोवैज्ञानिक दृष्टिकोणेन दृष्ट्वा ज्ञायते यत् मनुजानां पूर्वोक्त जिज्ञासा कारणात् एव ज्योतिष शास्त्रस्य गूढ़ रहस्योद्घाटने च प्रवृत्तिशीलः च क्रियते।

अस्मिन संसारे सर्वप्रथमं अन्तरिक्षे प्रयोगशालायां सम्मुखे आगतं ग्रहाणां नक्षत्राणि ज्योतिः पिण्डानां च स्वकुशलाक्षुणा च शोधादिकं कृत्वा अनेकानि गूढ़विषयाणामुपरि प्रकाशं ददने समर्थाः आसन्।

परन्तु अन्तरिक्ष (ज्योतिर्पिण्डः) प्रश्नानां सम्यक् उत्तरं मनुजैः वैज्ञाकिनाम् वा क्षेत्रः प्रायः सीमित च दृश्यते परन्तु व्योमश्च निःसीमः।

अतएव ज्योतिर्पिण्डानां ज्ञानार्थं अधुनाऽपि वैज्ञानिकाः विविध मार्गेण अन्तरिक्षे वा ग्रहाणामुपरि तु गच्छन्ति। एवं सम्यक् सन्तोषजनकोत्तरं प्राप्तिं स्थाने नवीन–नवीन अनेकानां प्रश्नानां मिश्रणं नीत्वा भूम्यूपरि आगच्छन्ति।

**ज्योतिषशास्त्रस्य वर्ण्यविषयाः ––**

ज्योतिषशास्त्रे अनेके विषयाः सन्ति। ज्योतिषशास्त्रं मुख्यतयाः त्रिषुभागेषुविभक्तोऽस्ति। तद्यथा ––

1. सिद्धान्तस्कन्धः।
2. संहितास्कन्धः।
3. होरास्कन्धः।

**सिद्धान्तस्कन्धे** कालगणना, खगोलविचारः, ग्रहाणा विविधगत्यादि, तेषां विविधफलानि, ग्रहयुतिफलम्, ग्रहणचर्चा, फलञ्चास्य विवेचनीयाः विषयाः।

**ज्योतिषशास्त्रस्य उद्भवः विकाशश्च**

ज्योतिष शास्त्रमतीवप्राचीनमास्ते। अस्य शास्त्रस्य बीजानि वेदवाक्येषु अपि दृश्यन्ते। यथा –– '' एकाचमे, त्रिस्रश्चमे, पञ्चचमे, सप्तचमे च'' इति कथनेन अस्मिन् मन्त्रे विषमसंख्याप्रदर्शकस्य गणितस्य बीजमुपलभ्यते। वेदाङ्गतां गतस्य ज्योतिषशास्त्रस्य प्रवर्तकाः अष्टादश संख्यकाः महर्षयः आसन्। ज्योतिषस्य उद्भवमपि ब्राह्मणभूतः। पितामहब्रह्मणा अस्य चराचरजगतं यज्ञयाज्ञादिसाधननिमित्तं चतुर्भ्यो मुखेभ्यः चत्वारः वेदाः प्रादुर्भूताजाताः। यज्ञयागादिनां–कर्मफलं प्राप्तिहेतुः ब्रह्मणाकालबोधकं ज्योतिशास्त्रं प्रथमं नारदाय, सौमशौनकादयः, नारायणो वशिष्ठाय, वशिष्ठो माण्डव्यवामदेवाभ्यां, व्यासः स्वशिष्याय, सूर्यो मयाय कथितवन्त।

उक्तं चे गर्गाचार्येण तद्यथा ––

स्वयं स्वयम्भुवा सृष्टं क्षिजन्मनाम्।

वेदाङ्गं ज्योतिषं ब्रह्मापरं याहितावहम्।। (गर्ग संहिता)

कालान्तरे वराहमिहिर– आर्यभट्ट – ब्रह्मगुप्त –लल्लाचार्य –श्रीपति –भोजदेव– भास्कराचार्य– केशव – गणेशदैवज्ञ– ज्ञानराज– कमलाकरदयाः अनेके विश्वप्रसिद्धाः ज्योतिषशास्त्रस्य प्रवर्तकाः अभूवन्। उपयुक्तविद्वद्भिः रचितग्रन्थाधारेण शनै– शनैः ज्योतिषशास्त्रस्य उद्भवः अनुमीयते।

अस्मिनसंसारे स्वार्थवशेन स्व–स्व पक्षं त्सक्त्वा यदि अन्वेषणं भवेत् तदा ज्ञायते यत् सर्वेषां शास्त्राणामनुसारेणैव ज्योतिषशास्त्रस्य कर्ताऽपि भरतीयाः एव आसन्।

स्वऋषीणामेव योगाभ्यासेन सूक्ष्म प्रणाली अक्षुण्णा मानव तनोः अन्तः स्थाने एव सौरमण्डले आकाशीयानां व्यवस्था च कृतवन्तः।

अंकविद्या तु अस्मिन शास्त्रस्य प्राणरूपो तस्यैव उद्भवः भारतदेशैव अभवत्। मध्यकालीन भारतीय संस्कृतिः नामकारण्ये स्वग्रन्थे ओझाजी महोदयेन लिखितं यत।

अन्यदेशवासीनां भारतवर्षात् प्राप्त ज्ञानं विश्लेषितम् अंकविद्यां एव दृश्यते।

सम्पूर्ण भूम्यूपरि गणित ज्योतिष विज्ञानादीनां विषयाणां प्रमुखोन्नति कारणं एव अंकविद्यायाया: 1 त: 9 पर्यनतम् संख्यानां श्रेय: जायते। एवं प्रकारेण संख्यानां 1 त: 9 पर्यन्तम् क्रम: भारतीयनां स्व श्रेय: जायते।

पूर्वोक्तोद्धरणात् सुस्पष्टं जायते यत् पुराकाले भारतीय ऋषय: खगोल: एवं ज्योतिषर्विज्ञानात् परिचय: आसन्।

प्राचीनकाले ग्रीसदेशे अनेकान् छात्रान् शास्त्राध्ययन हेतु अत्र भारतवर्षे आगतवन्त: एवं अत्रैव निवासयित्वा आचार्यै: विभिन्न शास्त्राणामध्ययने ते निरता:।

भारतवर्षस्य केचन् ज्योतिर्विदा: ई.स. चतुर्थ एवं पंचमे च ग्रीसदेशे गतवान्।

अनेन कारणेन च ज्योतिष शास्त्रे ग्रीकभाषाया: अनेकान शब्दान् च प्रयुज्यते। मेष:, वृष:, मंगल, गुरूत्यादि।

**ज्योतिषशास्त्रस्य विकास:**

ज्योतिषशास्त्रस्य स्कन्धत्रयं होरा सिद्धान्त: संहिताश्चोच्यते। परन्तु कोऽपि स्थाने स्कन्धपंच होरा–सिद्धान्त, संहिता, प्रश्न साकुनश्च नाम्नेति।

ज्योतिषस्य विराट पंचस्कन्धान्तर्गतमेव मनोविज्ञान ;चैलबवसवहलद्ध जीवविज्ञान, (Biology) रसायनविज्ञान, (Chemistry)चिकित्साशास्त्र (Medical Scince) इत्यादीनां उत्पत्तिश्च जायते।

अत्यन्त प्राचीनकाले ग्रहनक्षत्र एवं ज्योति: पिण्डानां यस्मिन शास्त्रे तदेव शास्त्रोऽयं। भारतीय जनानां दृष्टि यदा सूर्योपरि एव चन्द्रोपरि प्रथमं गतं तदा ते जना: भयभीता: एवं तयो: दैत्यरूपं ज्ञात्वा मन्त्रादित: स्तुतिपूरक पूजने निरता:।

ब्राह्मण एवं आरण्यक ग्रन्थानां समये वा ग्रन्थेषु च परिभाषामिदं विकसिता जाता। एवं तस्मिन् समये नक्षत्राणां आकृतिः स्वरूपाणि वा गुणरूपं मानव जीवने तेषां महत्वं प्रभावादिकं च मनुजैः प्राप्तम्। फलित ज्योतिषस्य विस्तारो आदिकालस्यान्तिमें चरणे च जातः।

**होरा :–**अस्य अपरो नामः जातकशास्त्रमपि निगदितम्। वाराहमिहिराचार्येण स्वकीये वृहज्जातके च लिखितम् ––

हेरेत्यहोरात्रविकल्पमेके –––––––––––––– व्यनक्ति।

जातकस्य जन्म समये अन्तरिक्षे ग्रहाणां स्थितिः गत्यादिकं ज्ञात्वा चात्र शुभाशुभ फलकथनं क्रियते। अत्र जन्मपत्रिकायाः द्वादश भवानां शुभाशुभ फलं तेषामुपस्थित ग्रहाणां राश्यादीनां ज्ञानात् सविस्तरं प्रतिपादनं च जायते।

होराशास्त्रकारैः तु अत्र ग्रहाणां बलाबलं ग्रहवर्ग विंशोत्तरी इत्यादि दशादिसु गोचरादि भ्रमण प्रभावात् फलकथनं निर्देशश्च दृश्यते।

अत्र वाराहाचार्यः कल्याणवर्मा, पाराशरः सिद्धसेन, ढुण्डिराजः, केशवादि प्रधानाचार्याः।

**गणितः सिद्धान्तो वा :–**अस्य विभागस्य परिभाषादिकं च विकसितो दृश्यते। अत्र त्रुप्यादितः आरभ्य कल्पकाल पर्यन्तं कालगणना, सौर–चन्द्रमासादीनां भेद ज्ञानम्, ग्रहाणा गति निरूपणं, व्यक्ताव्यक्त गणितः प्रयोजनं सहितं, त्रिप्रश्नाधिकारः विविध जलयन्त्रादिकं निर्माणं, अक्षज्या, लम्बज्या, कुज्या, द्युज्या, अक्षांश रेखांश, अहर्गण साधनविधिः ग्रहनयन विधिः पञ्चांग निर्माणादीनां ज्ञानं विस्तृतरूपेण विद्यते।

अस्मिन् विभागे गणितीय सिद्धान्तः तन्त्रः करणश्च प्राप्यते। सिद्धान्त विभागे सृष्टि आरंभकालाद् इष्ट दिनपर्यन्तं अहर्गण साधनं तन्त्रे तु युगादितः

आरभ्य एवं करणे च स्वकल्पित इष्टवर्षे एव स्वदिन पर्यन्तं अहर्गण साधन भवति।

भास्कराचार्यः लाटदेव लल्लाचार्यः, केशवदैवज्ञः, वाराहादिकं मुख्याचार्याः वर्तन्ते मुख्यतया विभागेऽस्मिन्।

**संहिता :–**अत्र भूशोधनं, दिक्शोधनं, गृहोपकरणं, इष्टिकाद्वार, मेलापक, गेहद्वार, गृहप्रवेश, मांगलिक कृत्यानां शुभमुर्हूतः, ग्रहाचारः उल्कापातः भूकम्पः, वृक्षाणां विचारः, पुष्यस्नानादीनां सविस्तरं वर्णनं दृश्यते।

**प्रश्नशास्त्रम् :–**

इयं शास्त्रज्ञः शीघ्रफलकथने समर्थः। पृच्छकस्य स्वरं श्रुत्वा तस्योत्तरं फलं वा अत्र विद्यते। अत्राऽपि सिद्धान्तत्रयं विद्यते।

1. प्रश्नाक्षर सिद्धान्तः
2. प्रश्नलग्न सिद्धान्तः
3. स्वरविज्ञानशास्त्रश्च।

केरल प्रश्नसंग्रहः, पृथुयशदैवज्ञस्य षटपंञ्चाशिकाः, केवलप्रश्नज्ञान चूड़ामणिः, चन्द्रन्मीलन प्रश्न इत्यादिकं ग्रन्थाः प्रसिद्धाश्च। नवदश तथा एकादशशताब्दे अस्य शास्त्रस्य बाहुल्येन विकासः जातः। अनेन कारणेन अन्य स्वतन्त्र रचनापि अस्मिन् विषयोपरि लिखिता जातः। अस्य शास्त्रस्य उत्तरमध्यकालपर्यन्तं अनेकसंशोधनानि जातानि सन्ति।

**शकुनशास्त्रम् –**

अस्य अपरोनाम् निमित्तशास्त्रं च प्राप्यते। पूर्वमध्यकालपर्यन्तं अस्य पृथक स्थानं नासीत्। प्रारम्भकाले तु अस्य गणना संहिता अन्तर्गतं च परन्तु द्वादश शताब्द्याम् मध्ये स्वतंत्र ग्रन्थाः च प्राप्यन्ते। वसन्तराजशकुनः अद्भुतसागारदिकं मुख्यतया ग्रन्थाः दृश्यन्ते।दशमशताब्दी तः द्वादशश्ताब्दी पर्यन्तं अस्मिन् विषयोपरि स्वतन्त्रविचारः जातः।

## ज्योतिषस्य वैविध्यम् –

ज्योतिषः विविधविषयभेदेन परिपूर्णो विद्यते। आदिकालदारभ्यः कालगणना, जातकस्य पूर्वजन्मनाकृतं शुभाशुभफलं तस्यानिर्धारणेत्यादिनां विविधतवलोकनेन ज्योतिषशास्त्रस्य वैविध्यं स्वयं सिद्धयति। अस्य विषयोपरि उक्तं च वराहमिहिरेण। तद्यथा ––

ज्योतिषशास्त्रमनेकभेदेविषयं स्कन्धत्रयाधिष्ठितं।
तत्कात्स्न्योपनयस्य नाम मुनिभिः संकीर्त्यते संहिता।
स्कन्धेस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ
होराऽन्योऽङ्गविनिमयश्च कथितः स्कन्धस्तृतीयोऽपरः।।[1]

सामान्यतो हि ज्योतिषं सिद्धान्त–संहिता –होरा – भेदेन त्रिस्कन्धेषु विभक्तोऽस्ति। परन्तु कैरलि शकनुश्चेति भेदद्वयं संयुक्तेन इदं ज्योतिष शास्त्रं पञ्चस्कन्धमुच्यते। ज्योतिशास्त्रकालविधानपरकं शास्त्रं विद्यते। अस्य प्रतिपाद्यः विषयोऽपि कालैवास्ति। तन्त्रं कथनेन ग्रहगतेर्ज्ञानं भवति।

मध्यगतिसाधन, तिथिनक्षत्रस्टगतिः, चन्द्रार्कग्रहणेउदयास्तः।

श्रृङ्गोन्नतिसमागमः, तारासंयोगश्च तन्त्रस्य विवेच्यविषयाः सन्ति। संहितास्कन्धः भौतिकफलितज्योतिष इत्यनेनापि ज्ञायते। वस्तुतः सर्वेषांमेव स्कन्धानां सङ्क्षेपेण विवेचनादि संहितायाः संहितात्वम्। सांवत्सरसूत्रं, ग्रहचारः, ग्रहयुतिः, वर्षफलं, श्रृङ्गाटकं, उल्काविवेकः, वास्तुवृक्षायुर्वेदविचारः, गर्भविवकः, तिथ्यादिफलं शकुनविचारः, ग्रहस्थितितिथिनक्षत्रादिद्वारा जातकस्य सुखदुखयोः निर्णीयते सः होरास्कन्ध कथ्यते। होराशास्त्रं जातकशास्त्रेणपि ज्ञायते।

उक्तं च कल्याणवर्मणा –––

जातकमिति प्रसिद्धं यल्लोके तदिह कीर्त्त्यते होरा।
अथवा दैवविर्मशनपर्याय खल्वयं शब्दः।।[2]

---

**1. वृहद् संहिता – 1/9**
**2. सारा. 2/4**

जन्मकालीकग्रहनक्षत्र तिथि राश्यादिनाधारीकृत्य फलादेशः क्रियते तज्जातकम्। तत् सम्बद्धग्रन्थः वृहत्जातकम्। यत्र गोचरामाधरीकृत्य फलादेशः क्रियते तत्ताजितकम्। यत्र प्रश्नलग्नद्वारा फलादेशः क्रियते तत्प्रश्नशास्त्रम्। स्वप्नविवेचनेन शुभाशुभफलादेशः क्रियते तत् स्वप्न शास्त्रम्।

**संहितास्कन्धे** भौतिकफलितस्य चर्चा वर्तते। संहितायां संवत्सरसूत्रं, ग्रहचारः, ग्रहयुतिः, वर्षफलम्, गर्भविवेकः, उल्काविवेकः, जल ज्ञानं इति संहितायाः विवेचनीयविषयाः सन्ति।

ग्रहाणां सामूहिक प्रभावो येन ज्ञायते सः संहितास्कन्धः कथ्यते। सुनिश्चित वर्तते यत् होरा स। हिताया विषयभागः। कोऽपि जनान् ग्रहस्यप्रभावभवत्येव। अतः संहिता प्राणितात्रे ग्रहभावः कालस्थितिञ्च निरूपयति। अनुमीयते यत् संहितास्कन्धः सिद्धान्तस्कन्धात् प्राचीनो वर्तते।

सिद्धान्तहोरायोरेकत्र वर्णनमेव संहिता इति। कल्याणवर्मणा स्पष्टमेव वर्णितम् यत् यज्जातकस्य शुभाशुभादि कर्मुलादेशिका होरा इति। उक्तं च –

कर्मफललाभहेतुं चतुराः संवर्णयन्तयन्ये।
होरेति शास्त्रज्ञानं लग्नस्य तथार्धराशेश्च।।
जातकमिति प्रसिद्धं यल्लोके तदिह कीर्त्यते होरा।।[1]

प्रथमं संहिता एव प्रचलितमासीत्। पश्चात् विशिष्टज्ञानाय संहिता तः सिद्धान्तभागः पृथक्कृत। संहिताकालेऽपि इदं दृश्यते यत् प्रत्येककर्मनिमित्तं शुभमुर्हूतमावश्यकम् कारणं तु शुभेमुर्हूते कृतं कार्यं शुभफलदो भवति अन्यथा अशुभफलं प्राप्यते। इदं अनुमीयते यत् वेदकालपर्यन्तं संहिताशास्त्रस्य पृथक अस्तितवं नैवासीत्। महाभारते हि कतिपयेषां संहिताशास्त्राणां विशेषतो व्याससंहितायाम् अवस्थिति संसूचकानि वचनानि अनुपलभ्यन्ते।

---

1. सारावली –2/3

यथा महाभारते –

तत इष्टेनहनि प्रापते मूर्हूते साधसम्मते।
जग्राह विधिवत्पाणि माद्रयाः पाण्डुर्नराधिपः।।[2]
ऐन्द्र चन्द्र समायुक्ते मुर्हूर्तेऽभिजिदष्टमे।
दिवा मध्यगते सूर्ये तिथौ पूर्णेतिपूजते।।[3]

न केवलं महाभारते अपितु वाल्मीकिरामायणेऽपि संहितायाविषयः प्राप्यन्ते। यथा –

युक्ते मुर्हूते विजये सर्वाभरणभूषितैः।
भातृभिः सहितो रामः कृतकौतुकमङ्गलः।।[3]
चैत्रः श्रीमानयं मासः पुण्यः पुष्पितकाननः।
श्व एव पुण्यो भविता श्वोऽभिषेच्यस्त मु सुतः।।[4]

एवं सिद्धौ भवति यत् रामायणेऽपि ज्योतिषस्य चर्चा विस्तरेण कृता अस्ति। वेदस्य विविधभागेषु शुभकालसूचकानि केषाञ्चिद्वचनानि समुद्धियन्ते यथा –

**सिद्धान्तस्कन्धः–**

पुरुषार्थसिद्धिरेवास्य वांगमयस्य चरमं लक्ष्यम्। पुरुषार्थश्च चतुर्विधो धर्मार्थकाममोक्षभेदेन, धर्मो हि बुद्धेर्विषयः सदसद्विवेकलक्षणम्। अर्थश्च शरीरविषयो व्यवहारलक्षणम्। कामो हि मनसो विषयभोग लक्ष्यम्। मोक्षस्तु आत्मनो विषयः चरमनिवृत्ति लक्षणम्। अतः यथायोग्यम् प्रवृत्तिनिवृत्त्यु–पदेशप्रतिपादनैवलक्षण्यमेवास्य वैशिष्ट्यम् । यथा –

---

1. महा. 1/113/16
2. महा. 1/113/6
3. वा.रा.1/63/9
4. वा.रा.2/3/4

धर्मार्थकामाः सममेव सेव्या यो ह्येकभभः स नरो जघन्यः।।[1]

धर्मानुरोधेन अर्थश्च अर्थस्यानुरोधेन कामस्य, मोक्षानुरोधेन सर्वेषांमुपयोगः एवास्य परमसन्देशः। जनानां वरमो लक्ष्यवर्तते। तन्त्र हि सिद्धान्तस्य पयार्यमस्ति।

ज्योतिषगणितस्य सर्वप्राचीन उपलब्धग्रन्थमध्ये सूर्यसिद्धान्तादि पंचसिद्धान्त सन्ति। ते अपौरुषेयाः मन्यन्ते। ते पंचसिद्धान्ताः निम्ना सन्ति। यथा –

1. प्राचीनसिद्धान्तपञ्चकम्
2. पितामहसिद्धान्तः
3. वसिष्ठसिद्धान्तः
4. रोमकसिद्धान्तः
5. वौकिशसिद्धान्तः

**प्राचीनसिद्धान्तः** :

वराहमिहिरस्य अयं ग्रन्थः वर्तते। अस्मिन् ग्रन्थे पंचसिद्धान्तस्यवर्णनं कृतोऽस्ति। उक्तं च यत् –

पौलिश्वरोमकवशिष्ठसौरपैतामहास्तु पंच सिद्धान्ताः।
पञ्चभ्यो द्वावाद्यौ व्याख्यातौ लाटदेवेन्।।[2]

**पितामहसिद्धान्तः**

अस्य मलतत्वानां वर्णनं वराहमिहिरेण गणितपद्धत्याः सकलकालमानेन लिखिताः अस्ति।

**वसिष्ठसिद्धान्तः** –अयं सिद्धान्त प्राचीन–नवीन भेदेन द्विविधै स्तः। यथा –

पौलिश्वरोमकवशिष्ठसौरपैतामहेषु यत्प्रोभम्।
तन्नक्षत्रानयन ंनार्यभटोक्तं तदुभिरतः।।[3]

---

1. ज्यो.शास्त्र का इति. पृ.–2
2. ज्यो.इति. पृ.–66
3. ज्यो.इति. पृ.–68

**रोमकसिद्धान्तः**

अयं सिद्धान्तो हि सिद्धान्तपञ्चाशियां वैशद्येन व्याख्यातः। दिङ्मात्रं यथा –

सप्तविश्ववेदसङ्ख्यककालमपास्य चैत्रशुक्लादौ।
अर्धास्तमिते भानौ यवनपुरे भौमादिवसाद्यः।।[1]

**पौलिशसिद्धान्तः –**

पराशरं हि ज्ञानं पुलिशायख्येन मुनिना गर्गादिभ्यः उक्तं तदेव पौलिशगणिमिति पसिद्धम्। सिद्धान्तोऽयं पञ्चसिद्धान्तिकायां व्याख्यतः। यथा–

रुद्रघः सममुशुरो लब्धोनो गुरवसप्तभिर्द्युगुणाः।

रोमकसिद्धान्तोऽयं नातिचिरे पौलिशेऽप्येयम्।।[2]

**होरास्कन्धेः** हि जातकसम्बद्धः। पितामह–वशिष्ठकश्यपादिसुनिर्मितं ज्योतिषशास्त्रस्कन्धरूपं जन्माविविधफलादेशरूपं वेदचक्षुरूपं द्विजामध्यनीयं होराशास्त्रं वाच्यम्। अहोरात्रं शब्दात् आद्यान्त वर्णलोपात् भवति होरा शब्दः। अत्रैव ग्रहसिीति फलं, ग्रहदृष्टि फलं, अरिष्टविचारः, आयुविचारः, विविधराजयोगादीनाम् विवेचनं होरास्कन्धे विवेच्यन्ते।

होराविषये पराशरेण उक्तं यत् –

अहोरात्रस्यपूर्वान्त्यलोपाद्होराऽवशिष्यते।[3]

होराशब्दस्य प्रयोगः लघुजातकेऽपि कृतमस्ति। यथा –

गृहाहोराद्रेष्काणा नवभागोद्वादशांशकस्त्रिशः।
वर्गः प्रत्येतव्यो ग्रहस्य यो यस्य निर्दिष्टः।।[4]

---

1. रो. सिद्धान्त 1/8
1. भार.ज्यो. का इति. पृ.–71
2. ब.हो. –4/1
4. लघु. जा.1/23

होराशब्दस्य शास्त्रार्थे तु सर्वत्रैव प्रयोगप्राप्तं भवति। होराशास्त्रविषयो हि लोकानां पूर्वजन्मोपार्जिकर्म सद्सत्फलकथनमेव वर्तते। उक्तं च बृहत्ज्जातके –

कर्मार्जितं पूर्वभवे सदादि यत्तस्य पङ्क्तिः समभिव्यनक्ति।[1]

होराशास्त्रं हि पञ्चधा विभक्तः। यथा–

1. जातकम्
2. ताजिकम्
3. रमलम्
4. प्रश्नम्
5. स्वप्नश्चेति।

होराशास्त्रमेव जातकशब्देनाऽप्यभिधीयते। कथितं च कल्याणवर्मणा –

जातकमिति प्रसिद्धं यल्लोके तदिह कीर्त्यतेहोरा।
अथवा दैवविमर्शनपायः खल्वयं शब्दः।।[2]

**भावविचारः –**

मनुष्यानां जन्मकुण्डल्यां ग्रहस्थितिः एकस्मिन् चक्रे लिखितं भवति। सः जन्माङ्गम् वा जन्मचक्रं च उच्यते।

**द्वादश भावानां नामोल्लेखः**

तनुर्धनं सोदर मित्र पुत्रशत्रुप्रिया मृत्युः शुभाः क्रमेण।

कर्मायसंज्ञौ व्यनामधेयोलग्नाादिभावा विबुधैरिहोक्ताः।।

अर्थात् लग्न वा प्रथम भावातःआरभ्य द्वादशभाव पर्यन्तं भावस्यनामानि ईदृशी भवति। यथा –

---

1. बृ.जा.–1/3
2. सारावली – 2/4

| क्रम | भावस्थानानि | भावनामानि |
|---|---|---|
| 1 | प्रथमभावः | तनुः |
| 2 | द्वितीयभावः | धनम् |
| 3 | तृतीयभावः | सहोदरम् |
| 4 | चतुर्थभावः | मित्रः |
| 5 | पञ्चमभावः | पुत्रः |
| 6 | षष्ठभावः | रोगः |
| 7 | सप्तमभावः | पत्नी |
| 8 | अष्टमभावः | मृत्युः |
| 9 | नवमभावः | भाग्य |
| 10 | दशमभावः | कर्म |
| 11 | एकादशभावः | आयः |
| 12 | द्वादशभावः | व्ययः |

**द्वादशभावानां पर्यायनामानि –**

कल्पोदयाद्य तनुजन्मविलग्नहोरा –
वागर्थभुक्ति नयनस्वकुटंब भानि।
दुश्चिक्य विक्रम सहोदर वीर्यधैर्यः,
कर्णास्तृतीय भवनस्य भवन्ति संज्ञा।।
पातालवृद्धिहिबुकक्षितमातृविद्या
यानाम्बुगहसुख बन्धुचतुष्टयानि।
धीदेवराजजपित नन्दन पञ्चकानि
रोगांगशस्त्रभयषष्ठरिपुक्षतानि।।
जामित्र कामगमनानि कलत्रसम्पद्
द्यूनास्तसप्तमगृहाणि वदन्ति चार्याः।
रन्ध्रायुरष्टरणमुत्यु विनाशनानि
धर्मो गुरुः शुभतयो नवभाग्यभानि।।
व्यापारमेषूरणमध्यमानं ज्ञानंच राजास्पदकर्मसंज्ञा।
एकादशोपन्त्यभावायलाभारिष्कव्ययद्वादश कान्त्यभानि।।[1]

---

1. **जातक पारिजातः**

## द्वादशभावानां पर्यायनामानि कोष्ठक –

| क्रम | भावनामानि | पर्यायानामानि |
|---|---|---|
| 1 | प्रथमभावः | कल्प, उदय, आद्य, तनु, जन्म, लग्न, विलग्न, होरा |
| 2 | द्वितीयभावः | वाक्, अर्घ, भुक्तिः, नयन, स्व, कुटुम्ब |
| 3 | तृतीयभावः | दुश्चिक्यः, विक्रम, सहोदर, वीर्य, धैर्य, कर्णः |
| 4 | चतुर्थभावः | पाताल, वृद्धि, हिबुक, क्षिति, मातृ, विद्या, वाहन, गृह, सुख, बन्धु, चतुष्टय |
| 5 | पंचमभावः | घी, देवराज, विद्या, पिता, पुत्र, पंञ्चक |
| 6 | षष्ठभावः | रोग, शस्त्र, भय, षष्ठ, रिपु, क्षत |
| 7 | सप्तम्भावः | जमित्र, काम, गमन, कलत्र, सम्पत, द्यून, अस्त, सप्तम् |
| 8 | अष्टमभावः | रन्ध्र, आयु, अष्टम्, रण, मृत्यु, विनाश |
| 9 | नवमभावः | धर्म, गुरू, शुभ, तप, नव, भाग्य |
| 10 | दशमभावः | व्यापार, मेषूरण, मध्य, ज्ञान, राज्य, आस्पद, कर्म |
| 11 | एकादशभावः | एकादश, उपान्त्य, भव, आय, लाभ |
| 12 | द्वादशभावः | रिःफ, द्वादश, अन्त्य, व्यय |

## 3. ज्योतिषशास्त्रे विविधयोगाः तेषामुपयोगिता च

ज्योतिषशास्त्रं हि विविधविषयकपरकं शास्त्रं विद्यते। ग्रहाणांकाला–वस्थागत्यादिनिर्देशेन कर्म सम्पादाननिमित्तकमुर्हूर्तादि कथनेन शुभाशुभफलकथनं अस्य शास्त्रस्य मुख्याशयः वर्तते। अस्मिन् शास्त्रे तु सहस्राधिकं योगाः वर्तन्ते। परन्तु अत्र प्रधान योगानामस्य उल्लेखः एव मया कृता। वाराहमिहिराचार्येण कथित अधोलिखितश्लोकानुसारेण ज्योतिषस्य बाहुल्यता एवं सर्वसिद्धयता स्वयं सिद्धं भवति। तद्यथा –

ज्योतिशास्त्रमनेकभेदविषयं स्कन्धत्रयाधितिष्ठितं
तत्कार्स्योपनपस्य नाम मुनिभिः सङ्कीर्त्यते संहिता।
स्कन्धेऽस्मिन् गणितेन या ग्रहगति स्तन्त्राभिधानस्त्वसौ
होरान्योऽङ्गविनियश्च कथितः स्कन्धस्तृतीयोऽपरः।।[1]

सामान्यतो हि ज्योतिषं सिद्धान्त–संहिता–होरा भेदेन त्रिस्कन्धेषु विभक्तोऽस्ति। अयं शास्त्रं कालविधानपरकं शास्त्रं मनयते। अस्य शास्त्रस्य प्रतिपाद्यः विषयोऽपि कालैवास्ति। तन्त्र कथनेन ग्रहगतेर्ज्ञानं भवति। मध्यमगतिसाधनं तिथि–नक्षत्रस्फुटगतिः चन्द्रार्कग्रहणोदयास्तः, तारा–संयोगाश्च तन्त्रस्य इत्यादि विवेचयविषयाः अस्य शास्त्रस्य सन्ति।

संहितास्कन्धविषये भौतिकज्योतिष इत्यपि ज्ञायते। वस्तुतः सर्वेषामेव स्कन्धानां संक्षेपेण विवेचनादि संहितायाःसंहितात्वम् वर्तते। संवतस्र, गहाचारः ग्रहयुतिः, वर्षफलं, उल्काविचारः, वास्तुवृक्षार्युवेदविचारः, गर्भविवेकः, तिथि, ग्रह, शकुनविचारः इत्यादि अस्य विवेचनीयाः विषयाः वर्तन्ते। सामान्यरूपेण ग्रहस्थिति–तिथि–नक्षत्रादिद्वारा जातकस्य सुखदुःखादि निर्णीयते सः होरास्कन्ध कथ्यते। अतः होराशास्त्रं जातकशास्त्रेणापि ज्ञायते। कल्याणवर्मणा अस्मिन् विषये कथिता यत् –

---

1. बृ.संहिता – 2/6

जातकमिति प्रसिद्धं यल्लोके तदिह कीर्त्यते होरा।
अथवा दैवविमर्शनपर्याय खल्वयं शब्दः।।[1]

जन्मकालिकग्रहनक्षत्रतिथिवारराश्यादीनामाधारीकृत्य फलादेशः क्रियते तज्जातकम्। तत् सम्बन्धग्रन्थः बृहत्जातकम्। यत्र गोचरमाधारीकृत्य फलादेशः क्रियते तत्ताजिकम्। यत्र प्रश्नलग्नैः फलादेशः क्रियते तत्प्रश्नशास्त्रम्। स्वप्नविवेचनेन शुभाशुभफलादेशः क्रियते तत्स्वप्नशास्त्रम्। ज्योतिषशास्त्रे अनेके योगाः सन्ति। अत्र विस्तारभयेन प्रमुखयोगानां चर्चा कृतं मया। ये–ये प्रमुखयोगाः सन्ति, तेषां नामानि एव प्रस्तूयते। तद्यथा –

| **क्रमः** | **योगाः** | **क्रमः** | **योगाः** |
|---|---|---|---|
| 1 | राजाधिराजयोगः | 31 | नगरयोगः |
| 2 | नृपयोगः | 32 | राहुकृतराजयोगः |
| 3 | नीचभङ्गयोगः | 33 | दिग्बयुक्तराजयोगः |
| 4 | भूपतिभाग्ययोगः | 34 | ध्वजयोगः |
| 5 | ऐश्वर्यप्रद योगः | 35 | मानीयोगः |
| 6 | नृपमानसमन्वित राजयोगः | 36 | अष्टकवर्गकृत राजयोगः |
| 7 | राजराजेश्वर राजयोगः | 37 | कल्पवृक्ष राजयोगः |
| 8 | गौरीयोगः | 38 | कामधेनुराजयोगः |
| 9 | श्रीछत्रयोगः | 39 | कुलभूषणराजयोगः |
| 10 | राजयोगभङ्गयोगः | 40 | गोपकुलोत्पन्नराजयोगः |
| 11 | नृपतुल्ययोगः | 41 | पद्मरागराजयोगः |

---

1. सा.व.–2/4

| | | | |
|---|---|---|---|
| 12 | मन्त्रीयोगः | 42 | श्रीवत्सयोगः |
| 13 | भूपतियोगः | 43 | सिंहासनयोगः |
| 14 | वक्रग्रहकृतयोगः | 44 | नीचभङ्गयोगः |
| 15 | पृथ्वीशयोगः | 45 | गौरीयोगः |
| 16 | ऐश्वर्यप्रदयोगः | 46 | शत्रुपीडाकारयोगः |
| 17 | कारिकायोगः | 47 | राजाधिराजयोगः |
| 18 | रत्नांजलिसयोगः | 48 | राजतुल्ययोगः |
| 19 | अखण्डसाम्राज्यराजयोगः | 49 | उल्कादिभियोगः |
| 20 | डोलायोगः | 50 | शुक्रेधराजभङ्गयोगः |
| 21 | श्रीनाथयोगः | 51 | परमनीच राजयोगः |
| 22 | श्रीछत्रयोगः | 52 | सुखप्राप्तियोगः |
| 23 | नगरयोगः | 53 | परोपकारीयोगः |
| 24 | समुद्रयोगः | 54 | कुटुम्बसंरक्षणयोगः |
| 25 | स्फीतयोगः | 55 | लक्षाविशयोगः |
| 26 | पुष्कलयोगः | 56 | सहस्रजनानांपालकयोग : |
| 27 | चतुः सागरयोगः | 57 | कोटिश्वरयोगः |
| 28 | इन्द्रयोगः | 58 | ज्ञातिउपकारकयोगः |
| 29 | नृपयोगः | 59 | राजकीयसविद्याप्राप्तियोगः |
| 30 | विपरीतराजयोगः | 60 | निःसन्तानयोगः |